युक्तानि सारदारुविनिर्म्मितानि पञ्च लाङ्गलकानि यस्मिन् ।) महादानभेदः । यथा,—
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
पञ्चलाङ्गलकं नाम महापातकनाशनम् ॥
पुण्यां तिथिं समासाद्य युगादिग्रहणादिकम् ।
भूमिदानं ततो दद्यात् पञ्चलाङ्गलकान्वितम् ॥
कर्व्वटं खेटकञ्चापि ग्रामं वा शस्यशालिनम् ।
निवर्त्तनशतं वापि तदर्द्धं वापि शक्तितः ॥
सारदारुमयान् कृत्वा हलान् पञ्च विचक्षणः ।
सर्व्वोपकरणैर्युक्तानन्यान् पञ्च च काञ्चनान् ॥
वृषलक्षणसंयुक्तान् दशैव तु धुरन्धरान् ।
सुवर्णशृङ्गाभरणान् मुक्तालाङ्गूलभूषितान् ॥
रौप्यपादाग्रतिलकानरक्तकौषेयभूषणान् ।
स्रग्दामचन्दनयुतान् शालायामधिवासयेत् ॥
पर्ज्जन्यादित्यरुद्रेभ्यः पायसं निर्व्वपेत् चरुम् ।
एकस्मिन्नेव कुण्डे तु गुरुर्यस्मिन्निवेदयेत् ॥
पालाशाः समिधस्तद्वदाज्यं कृष्णतिलांस्तथा ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः ॥
ततो मङ्गलशब्देन शुक्लमाल्याम्बरो बुधः ।
आहूय द्विजदाम्पत्यं हेमसूत्राङ्गुरीयकैः ॥
कौषेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत् ।
शय्यां सोपस्करां तद्वद्धेनुमेकां पयस्विनीम् ॥
तथाष्टादश धान्यानि समन्तादधिवासयेत् ।
ततः प्रदक्षिणां कृत्वा गृहीतकुसुमाञ्जलिः ॥
इममुच्चारयेन्मन्त्रमथ सर्व्वं निवेदयेत् ।
यस्माद्देवगणाः सर्व्वे स्थावराणि चराणि च ॥
धुरन्धराङ्गे तिष्ठन्ति तस्माद्भक्तिः शिवेऽस्तु मे ।
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोड़शीम् ॥
दानान्यन्यानि मे भक्तिर्धर्म्मे एव दृढ़ा भवेत् ।
दण्डेन सप्तहस्तेन त्रिंशद्दण्डान्निवर्त्तनम् ॥
त्रिभागहीनं गोचर्म्ममानमाह प्रजापतिः ।
मानेनानेन यो दद्यात् निवर्त्तनशतं बुधः ॥
विधिनानेन तस्याशु क्षीयते पापसंहतिः ।
तदर्द्धमथवा दद्यादपि गोचर्म्ममात्रकम् ।
भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते ॥
यावन्ति लाङ्गलकमार्गमुखानि भूमे-
स्तासां पतिर्द्दुहितुरङ्गजरोमकाणि ।
तावन्ति शङ्करपुरे वर्षाणि तिष्ठे-
द्भूमिप्रदानमथ यः कुरुते मनुष्यः ॥
गन्धर्व्वकिन्नरसुरासुरसिद्धसंघै-
राधूतचामरमुपेत्य महाद्विमानम् ।
सम्पूज्यते पितृपितामहबन्धुयुक्तः
शम्भोः पुरं व्रजति चामरनायकः सन् ॥
इन्द्रत्वमप्यधिगतं क्षयमभ्युपैति
गोभूमिलाङ्गलधुरन्धरसंप्रदानात् ।
तस्मादघौघपटलक्षयकारिभूमे-
र्द्दानं विधेयमिति भूतिभवाभवाय ॥"
इति मात्स्ये २५७ अध्यायः ॥

पञ्चलोहं, क्ली, (पञ्चं विस्तीर्णं लोहम् ।) सौराष्ट्रकलोहम् । इति हेमचन्द्रः ॥ (पञ्चगुणितं लोहम् । सुवर्णरजतताम्रसीसकरङ्गाणि ॥)

पञ्चलोहकं, क्ली, पञ्चानां लोहकानां धातूनां समाहारः । तद्यथा । सुवर्णरजतताम्ररङ्गनागानि । इति राजनिर्घण्टः ॥

पञ्चवक्त्रः, पुं, (पञ्च वक्त्राणि यस्य ।) शिवः । ("विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥"
इति शिवध्यानम् ॥)
अस्य मन्त्रा यथा,—
"समस्तानां स्वराणान्तु दीर्घाः शेषाः सबिन्दुकाः ।
अहन्तकशून्याः सार्द्धचन्द्रा उपान्ते नाभिसंहिताः ॥
एभिः पञ्चाक्षरैर्म्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
क्रमात् सम्मदसन्दोहमादगौरवसंज्ञकाः ॥
प्रासादन्तु भवेत् शेषं पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एकं समुदितं कृत्वा पञ्चभिर्व्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ॥
सम्मदादिषु मन्त्रेषु प्रासादन्तु प्रशस्यते ।
शम्भोः प्रसादनेनैव यस्मादृष्टस्तु मन्त्रकः ॥
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्म्मन्त्रः सम्मद उच्यते ।
मनःप्रपूरणश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवाह्वयः ।
एतद्व्यस्तं समस्तञ्च मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरञ्च यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
स्वयन्तेनैव मन्त्रेण आराधयतमीश्वरम् ॥ * ॥
ध्यानञ्च शृणु वक्ष्यामि सम्यग्वेतालभैरवौ ।
पञ्चवक्त्रं महाकायं जटाजूटविभूषितम् ॥
चारुचन्द्रकलायुक्तं मूर्द्ध्नि व्यालौघसंगतम् ।
बाहुभिर्द्दशभिर्युक्तं व्याघ्रचर्म्माम्बराम्बरम् ॥
कालकूटधरं कण्ठे नागहारोपशोभितम् ।
कोटीरबन्धनं बाहुभूषणञ्च भुजङ्गमाः ॥
विभूतिं सर्व्वगात्रेषु ज्योत्स्नार्पितस्वरोचिषम् ।
भूतिसंलिप्तसर्व्वाङ्गमेकैकञ्च त्रिभिस्त्रिभिः ॥
नेत्रैस्तु पञ्चदशभिर्ज्योतिश्चक्रैर्विभूषितम् ।
वृषभोपरि संस्थन्तु गजकृत्तिपरिच्छदम् ॥
सद्योजातं वामदेवमघोरञ्च ततः परम् ।
तत्पुरुषं यथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातं भवेद्वक्त्रं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
नीलवर्णमघोरन्तु दंष्ट्राभीतिविवर्द्धनम् ।
रक्तं तत्पुरुषं देवं दिव्यमूर्त्तिं मनोहरम् ॥
श्यामलञ्च तथेशानं सर्व्वदेव शिवात्मकम् ।
चिन्तयेत् पश्चिमे त्वाद्यं द्वितीयञ्च तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषन्तथा ।
ईशानं मध्यतो ध्येयं चिन्तयेद्भक्तितत्परः ॥
शक्तित्रिशूलखट्वाङ्गवरदाभयदं शिवम् ।
दक्षिणेष्वथ हस्तेषु वामेष्वपि ततः शृणु ॥
अक्षसूत्रं बीजपूरं भुजगं डमरूत्पलम् ।
अष्टैश्वर्य्यसमायुक्तं ध्यायेत्तु द्रुतं शिवम् ॥"
इति कालिकापुराणे ५० अध्यायः ॥ * ॥
पञ्चमुखरुद्राक्षः । यथा स्कान्दे,—
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥"
इति तिथितत्त्वम् ॥
(पञ्चं विस्तृतं वक्त्रं वदनं यस्य । इति विग्रहे । सिंहः ॥)

पञ्चवटः, पुं, (पञ्चो विस्तीर्णो वटः ।) उरस्कटः । तत्पर्य्यायः । जोटिङ्गः २ महाव्रती ३ बालयज्ञोपवीतकम् ४ । इति त्रिकाण्डशेषः ॥ (पञ्चसंख्यका वटा अश्वत्थविल्ववटधात्र्यशोकरूपा वृक्षा यस्मिन् । पञ्चवटीवनम् । यथा रामायणे । १ । ३ । १३ ।
"समागमं विराधेन वासं पञ्चवटे तथा ॥")

पञ्चवटी, स्त्री, (पञ्चानां वटानां समाहारः । तद्धितार्थेति तत्पुरुषः संख्यापूर्व्वो द्विगुरिति द्विगुसंज्ञायां "द्विगोः" ।४।१।२१। इति ङीष् । द्विगुरेकवचनमिति एकवचनम् ।) पञ्चप्रकारवृक्षविशेषः । यथा,—
"अश्वत्थविल्ववृक्षञ्च वटधात्रीअशोककम् ।
वटीपञ्चकमित्युक्तं स्थापयेत् पञ्चदिक्षु च ॥
अश्वत्थं स्थापयेत् प्राचि विल्वमुत्तरभागतः ।
वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा ॥
अशोकं वह्निदिक्स्थाप्य तपस्यार्थं सुरेश्वरि ।
मध्ये वेदीं चतुर्हस्तां सुन्दरीं सुमनोहराम् ॥
प्रतिष्ठां कारयेत्तस्याः पञ्चवर्षोत्तरं शिवे ! ।
अनन्तफलदात्री सा तपस्याफलदायिनी ॥ * ॥
इयं पञ्चवटी प्रोक्ता बृहत्पञ्चवटीं शृणु ।
विल्ववृक्षं मध्यभागे चतुर्द्दिक्षु चतुष्टयम् ॥
वटवृक्षं चतुष्कोणे वेदसंख्यं प्ररोपयेत् ।
अशोकं वर्त्तुलाकारं पञ्चविंशतिसम्मितम् ॥
दिग्विदिक्ष्वामलकीश्चैव एकैकं परमेश्वरि ।
अश्वत्थञ्च चतुर्द्दिक्षु बृहत्पञ्चवटी भवेत् ॥
यः करोति महेशानि ! साक्षादिन्द्रसमो भवेत् ।
इह लोके मन्त्रसिद्धिः परे च परमा गतिः ॥"
इति हेमाद्रीयव्रतखण्डधृतस्कन्दपुराणवचनानि ॥
(स्वनामख्यातः प्रदेशविशेषः । यथा, रामायणे । १ । १ । ४५ ।
"देशः पञ्चवटीनाम तत्र वासं स कल्पयत् ॥")

पञ्चवल्कलं, क्ली, (पञ्चानां वल्कलानां समाहारः ।) वल्कलपञ्चकम् । यथा,—
"न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः ।
सर्व्वैरेकत्र संयुक्तैः पञ्चवल्कलमुच्यते ॥"
अपि च ।
"न्यग्रोधोडुम्बराश्वत्थप्लक्षपिप्पलपीतनाः ।
क्षीरिवृक्षाश्च पञ्चैषां वल्कलं पञ्चवल्कलम् ॥"
इति शब्दचन्द्रिका ॥
अस्य गुणाः ।
"पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् ।
त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् ॥"
इति राजनिर्घण्टः ॥

पञ्चवाणः, पुं, (पञ्च वाणाः शरा यस्य सः ।) कामदेवः । इति हेमचन्द्रः ॥ पञ्चानां वाणानां समाहारे क्ली । (कामस्य पञ्च वाणा यथा,—
"द्रवणं शोषणं वाणं तापनं मोहनाभिधम् ।